भीषणः । इति मेदिनी । रे, ८० ॥ (यथा, महाभारते । २ । ६४ । ५० ।
"तस्य ते तदचः श्रुत्वा रौद्रं लोमप्रहर्षणम् ।
प्रचक्रुर्वहुलां पूजां कुरवस्तो धृतराष्ट्रजम् ॥")
रुद्रसम्बन्धिनि च ॥

रौद्री, स्त्री, (रौद्र+ङीप् ।) चण्डी । इति मेदिनी । रे, ८० ॥ रुद्रजटा । इति राजनिर्घण्टः ॥ रुरुदैत्यहतमहारौद्री माया महारौद्रीनाम्नी चामुण्डा च । यथा,—
"एक एव महादैत्यो रुरुस्तस्यौ महाम्बुधे ।
स च मायां महारौद्रीं रौरवीं विससर्ज्ज ह ॥
सा माया वहुधे भीमा सर्व्वदेवप्रमोहिनी ।
तया तु मोहिता देवाः सद्यो निद्रां तु भेजिरे ॥
देवी च त्रिशिखेनाजौ तं दैत्यं समताड़यत् ।
तया तु ताड़ितं तस्य दैत्यस्य शुभलोचने ।
चर्म्ममुण्डे उभे सम्यक् पृथग्भूते वभूवतुः ॥
रुरोस्तु दानवेन्द्रस्य चर्म्ममुण्डे चणाद्यतः ।
अपहृत्य हरेद्देवी चामुण्डा तेन साभवत् ॥
सर्व्वभूतमहारौद्री या देवी परमेश्वरी ।
संहारिणी तु या चैव कालरात्रिः प्रकीर्त्तिता ॥"
इति वाराहे त्रिशक्तिमाहात्म्यम् ॥

रौप्यं, क्ली, ( रूप्यमेव । अण् । ) रूप्यम् । इति राजनिर्घण्टः ॥ (यथा, माघे । ४ । ६७ ।
"दर्पणनिर्म्मलासु पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति
मुहुः ॥" )
तत्करणं यथा,—
"मध्वाज्यं गुड़लाक्षञ्च करेणा माक्षिकं रसम् ।
धमनाच्च भवेद्रौप्यं सुवर्णकरणं परम् ॥"
इति गारुड़े १८८ अध्यायः ॥
(औषधादिषु अस्यालाभे यद्द्रातव्यं तद्यथा,—
"सुवर्णमथ । रौप्यं ग्रस्तं यत्र न लभ्यते ।
तत्र कान्तिन कर्म्माणि भिषक् कुर्य्याद्विचक्षणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
तद्विशिष्टे, त्रि । यथा, भागवते । ४।२५।१४ ।
"स्वर्णरौप्यायसैः शृङ्गैः सङ्कुलां सर्व्वतो गृहैः ॥")

रौमं, क्ली, ( रुमायां लवणाकरे भवम् । रुमा+अण् । ) शाम्भरिलवणम् । इत्यमरटीकायां रामाश्रमः ॥

रौमकं, क्ली, शाम्भरिलवणम् । तत्पर्य्यायः । वसुकम् २ । इत्यमरः ॥ "रुमा नाम नदी लवणाकरः तत्र भवं रौमकम् । टघे कादिति णः रौमं ततः स्वार्थे कः रौमकम् ।" इति तट्टीकायां भरतः ॥ ( पर्य्यायोऽस्य यथा,—
"शाकम्भरीयं कथितं गुड़ाख्यं रौमकन्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । )

रौमलवणं, क्ली, ( रौमं लवणमिति । ) शाम्भरिलवणम् । इति रत्नमाला ॥

रौरवः, पुं, (रुरूणां मृगविशेषाणामयमिति । रुरु+अण् । ) नरकविशेषः । घोरः । इति मेदिनी । वे, ४६ ॥ आद्यस्य विवरणं यथा,—
"रौरवे कूटसाक्षी तु याति यश्चानृती नरः ।
तस्य स्वरूपं वदतो रौरवस्य निशामय ॥
योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः ।
जानुमात्रप्रमाणन्तु तत्र श्वभ्रं सुदुस्तरम् ॥
तत्राङ्गारचयो येन कृतं तद्धरणीसमम् ।
जाज्वल्यमानतीव्रेण तापिताम्बरभूमिना ॥
तन्मध्ये पापकर्म्माणं विमुञ्चन्ति यमानुगाः ।
स दह्यमानस्तीव्रेण वह्निना तेन धावति ॥
पदे पदे च पादोऽस्य शीर्य्यते जायते पुनः ।
अहोरात्रेणोद्धरणं पादन्यासं स गच्छति ।
एवं सहस्रं विस्तीर्णं योजनानां विमुच्यते ॥"
इति मार्कण्डेयपुराणे पितापुत्त्रसंवादनामाध्यायः ॥ (तथाच देवीभागवते ।८।२२।८-११।
"एतन्ममाहमिति यो भूतद्रोहेण केवलम् ।
पुष्णाति प्रत्यहं स्वीयकुटुम्बं कार्य्यलम्पटः ॥
एतद्विहाय चात्रैव स्वाशुभेन पतेदिह ।
रौरवे नाम नरके सर्व्वसत्त्वभयावहे ॥
इह लोकेऽमुना ये तु हिंसिता जन्तवः पुरा ।
त एव रुरवो भूत्वा परत्र पीड़यन्ति तम् ॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः ।
रुरुः सर्पादपि क्रूरो जन्तुरुक्तः पुरातनैः ॥")

रौरवः, त्रि, चञ्चलः । धर्त्तः । घोरः । इति शब्दरत्नावली ॥ ( रुरोर्मृगस्येदमिति । अण् । मृगसम्बन्धिनि च । यथा, मनुः । २ । ४१ ।
"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः ।
वसीरन्नानुपूर्व्व्येण शाणक्षौमाविकानि च ॥")

रौहिट्, [ ष् ] पुं, रौहिषमृगः । यथा । "स एव रौहिषां मध्ये चरतीति भवभूतिः ।" इत्यमरटीकायां भरतः ॥

रौहिणं, क्ली, ( रोहिणमेव । स्वार्थे अण् । ) दिनस्य नवममुहूर्त्तः । यथा । अत्र पूर्व्वाह्णे श्राद्धमभिधाय रौहिणन्तु न लङ्घयेदित्यभिधानेन पूर्व्वाह्णश्राद्धस्य सम्भवात् परो रौहिणपर्य्यन्तगौणपूर्व्वाह्णकालः प्रतीयते । तेन रौहिणं पूर्व्वाह्णश्राद्धस्य गौणकालत्वेनोत्तरावधिः अपराह्णश्राद्धस्य पूर्व्वावधिरित्यवगम्यते ततश्च पूर्व्वदिने सम्भवात् परं रौहिणपर्य्यन्तं तिथिलाभे परदिने मुहूर्त्तत्रयमात्रे तत्तिथिलाभे पूर्व्वदिने श्राद्धम् । रौहिणान्तस्वरूपगौणपूर्व्वाह्णलाभात् न परदिने तथात्वाभावात् । उभयदिने सम्भवलाभे परदिने शुक्लपक्षे तिथिर्ग्राह्या इति वचनात् । रौहिणन्तु दिवसस्य नवम मुहूर्त्तस्तस्य ज्योतिषोक्तरोहिणीदैवतत्वात् रौहिणत्वमिति । इति श्राद्धतत्त्वम् ॥

रौहिणः, पुं, ( रुह्+इनन् । स्वार्थे अण् । ) चन्दनद्रुमः । इति त्रिकाण्डशेषः ॥

रौहिणेयं, क्ली, मरकतमणिः । इति राजनिर्घण्टः ॥

रौहिणेयः, पुं, (रोहिण्या अपत्यमिति । रोहिणी +"शुभ्रादिभ्यश्च ।" ४।१।१२३ । इति ढक् । ) वलदेवः । (यथा, महाभारते । १।१६२।१६ ।
"तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सहरौहिणेयः ॥")
बुधग्रहः । इत्यमरः ॥ (पुरुषोत्तमस्थतीर्थविशेषकान्यतमः । यथा, तीर्थतत्त्वे ।
"मार्कण्डेये वटे कृष्णे रौहिणेये महोदधौ ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते ॥")

रौहिणेयः, त्रि, (रोहिण्या अपत्यमिति । रोहिणी +ढक् ।) गोवत्सः । इति मेदिनी । ये, १२७ ॥

रौहिषं, क्ली, (रोहतीति । रुह्+"रुहेर्वृद्धिश्च ।" उणा० १।४८ । इति टिषच् । वृद्धिश्च धातोः ।) कत्तृणम् । इत्यमरः ॥ रोहिषतृणम् । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
"कत्तृणं रौहिषं देवजग्धं सौगन्धिकं तथा ।
भूतीकं ध्याम पौरञ्च श्यामकं धूपगन्धिकम् ॥
रौहिष तुवरं तिक्तं कटुपाकं व्यपोहति ।
हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान् ॥"
इति भावप्रकाशः ॥ * ॥
अन्यत् कत्तृणशब्दे द्रष्टव्यम् ॥

रौहिषः, पुं, ( रुह्+टिषच् । वृद्धिश्च धातोः । ) मृगविशेषः । इत्यमरः ॥ रोहितमत्स्यः । इति जटाधरः ॥

रौहिषी, स्त्री, ( रौहिष+ङीप् । ) मृगी । दूर्व्वा । इति संक्षिप्तसारोणादिवृत्तिः ॥

---

## ल

ल, लकारः । स तु यवर्गस्य तृतीयो वर्णो व्यञ्जनस्याष्टाविंशवर्णश्च । अस्योच्चारणस्थानं दन्ताः । इति व्याकरणम् ॥ (तथाच सिद्धान्तकौमुद्याम् । "लृतुलसानां दन्ताः ॥") तस्य स्वरूपं यथा,—
"लकारं चञ्चलापाङ्गि ! कुण्डलीत्रयसंयुतम् ।
पीतविद्युल्लताकारं सर्व्वरत्नप्रदायकम् ॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा ।
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा ।
आत्मादितत्त्वसहितं हृदि भावय पार्व्वति ! ॥"
इति कामधेनुतन्त्रम् ॥ * ॥
( वङ्गीयवर्णमालायाम् । ) अस्य लेखनप्रकारो यथा,—
"कुण्डलीत्रयसंयुक्ता वामाद्दक्षगता त्वधः ।
पुनरूर्द्ध्वगता रेखा तासु नारायणः शिवः ।
ब्रह्मशक्तिश्च सन्तिष्ठेद्ध्यानमस्य प्रचक्ष्यते ॥"
ध्यानं यथा,—
"चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम् ।
सर्व्वदा वरदां भीमां सर्व्वालङ्कारभूषिताम् ॥
योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीम् ।
चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम् ॥
एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥
तस्य नामानि यथा,—
"लक्ष्मः पूतना पृथ्वी माधवः शक्रवाचकः ।
दक्षाङ्गुलः पिनाकीशो व्यापको मांससंज्ञकः ॥